न्यस्तं धत्ते गौरवं यत्तुलायां
तन्निर्मौल्यं मौक्तिकं सौख्यदायि ।”
अस्या दोषलक्षणं यथा,—
“यद्विच्छायं मौक्तिकं व्यङ्गकायं
शुक्तिस्पर्शं रक्ततां चातिधत्ते ।
मत्स्याक्षाङ्कं व्यक्तमुत्तानमत्र्यं
नैतद्धार्य्यं धीमता दोषदायि ।”
अष्टधा मौक्तिकं यथा,—
“मातङ्गोरगमीनपोत्रिशिरसस्त्वक्सारशङ्खाम्बुभृच्छुक्तीनामुदराच्च मौक्तिकमणिः स्पष्टं भवत्यष्टधा ।”
मौक्तिकविशेषो यथा,—
“छायापाटलनीलपीतधवलास्तत्रापि सामान्यतः
सप्तानां बहुशो न लब्धिरिति चेन्मौक्तिकं तूल्यताम् ।”* ।
मौक्तिकपरीक्षा यथा,—
“लवणक्षारचोदिनि मार्ज्जनगोमूत्रपूरिते चिप्तम् ।
मर्द्दितमपि शालीतुषैर्यदविकृतं तन्मौक्तिकं जात्यम् ।”
इति राजनिर्घण्टः ॥ * ॥
तदुत्पत्तिस्थानानि यथा,—
“शङ्खो गजश्च क्रोड़श्च फणी मत्स्यश्च दर्दुरः ।
वेणुरेते समाख्यातास्तज्ज्ञैर्मौक्तिकयोनयः ।”
इति भावप्रकाशः ॥ * ॥
अथ प्रकारान्तरमुक्तापरीक्षा ।
“द्विपेन्द्रजीमूतवराहशङ्ख-
मत्स्याहिशुक्त्युद्भववेणुजानि ।
मुक्ताफलानि प्रथितानि लोके
तेषान्तु शुक्त्युद्भवमेव भूरि ॥
वेध्यन्तु शुक्त्युद्भवमेव तेषां
शेषाण्यवेध्यानि वदन्ति तज्ज्ञाः ।
मतङ्गजा ये तु विशुद्धवंश्या-
स्ते मौक्तिकानां प्रभवाः प्रदिष्टाः ॥
उत्पद्यते मौक्तिकमेषु वृत्त-
मापीतवर्णं प्रभया विहीनम् ॥
वक्ष्ये गजपरीक्षायां गजजातिश्चतुर्व्विधा ।
मौक्तिकं तेषु जातं हि चतुर्व्विधमुदीर्य्यते ॥
ब्राह्मं पीतशुक्लन्तु क्षत्रियं पीतरक्तकम् ।
पीतश्यामन्तु वैश्यं स्यात् शूद्रं स्यात् पीतनीलकम् ।
काम्बोजकुम्भसम्भूतं धात्रीफलनिभं गुरु ।
अतिपिञ्जरसच्छायं मौक्तिकं मन्ददीधिति ॥
धाराधरेषु जायेत मौक्तिकं जलबिन्दुभिः ।
दुर्लभं तन्मनुष्याणां देवैस्तत् ह्रियतेऽम्बरात् ॥
कुक्कुटाण्डसमं वृत्तं मौक्तिकं निविड़ं गुरु ।
घनजं भानुसङ्काशं देवयोग्यममानुषम् ।”* ।
तथाहि गारुड़े ।
“नाभ्येति मेघप्रभवं धरित्रीं
वियद्गतं तद्विबुधा हरन्ति ।
अर्च्चिःप्रभानाशितदिग्विभाग-
मादित्यवद्दुःखविभाव्यबिम्बम् ॥
तेजस्तिरस्कृत्य हुताशनेन्दु-
नक्षत्रताराग्रहसम्भवञ्च ।
दिवा यथा दीप्तिकरन्तथैव
तमोऽवगाढ़ास्वपि तन्निशासु ॥
विचित्ररत्नद्युतिचारुतोय-
चतुःसमुद्रा भवनाभिरामा ।
मूल्यं न वा स्यादिति निश्चयो मे
कृत्स्ना मही तस्य सुवर्णपूर्णा ॥
हीनोऽपि यस्तल्लभते कथञ्चित्
विपाकयोगान्महतः शुभस्य ।
सपत्नहीनः पृथिवीं समग्रां
भुनक्ति तत्तिष्ठति यावदेव ॥
न केवलं तच्छुभकृन्नृपस्य
भाग्यैः प्रजानामपि जन्म तस्य ।
तद्योजनानां परितः शतस्य
सर्व्वाननर्थान् विमुखीकरोति ॥
जलज्योतिर्मरुज्जानां मेघानां त्रिविधं भवेत् ।
जलाधिकेऽधिकं स्वच्छं कोमलं गुरु कान्तिमत् ॥
ज्योतिषं कान्तिमद्वृत्तं दुर्निरीक्ष्यं रविप्रभम् ।
कान्तिमत् कोमलं वृत्तं मारुतं विमलं लघु ॥
वराहदंष्ट्राप्रभवं वरिष्ठं
तस्यैव दंष्ट्राङ्कुरतुल्यवर्णम् ।
क्वचित् कथञ्चित् स भुवः प्रदेशे
प्रजायते शूकरवद्वरिष्ठः ॥
ब्रह्मादिजातिभेदेन वराहोऽपि चतुर्व्विधः
तेषु जाता भवेन्मुक्ता समासेन चतुर्व्विधा ॥
ब्राह्मणः शुक्लवर्णस्तु शूद्रमन्त्येऽस्य लक्ष्यते ।
क्षत्रियः शुक्लरक्तस्तु स्पर्शे कर्कश एव च ॥
वैश्यः स्यात् शुक्लपीतस्तु कोमलः कोलसन्निभः ।
शूद्रः स्याच्छुक्लनीलस्तु कर्कशः श्याम एव च ।”
तथा च ।
“कोलजं कोलसदृशं तद्दंष्ट्रासदृशच्छवि ।
अलभ्यं मनुजै रम्यं मौक्तिकं पुण्यवर्ज्जितैः ॥* ।
ये कम्बवः शार्ङ्गसुखावमर्ष-
पीतस्य शङ्खप्रवरस्य गोत्रे ।
स्यान्मौक्तिकानामिह तेषु जन्म
तल्लक्षणं संप्रति कीर्त्तयामः ॥
स्वयोनिमध्यच्छवितुल्यवर्णं
शङ्खाद्वृहत्कोलफलप्रमाणम् ॥
तथा च ।
वर्षोपलसमं दीप्त्या पाञ्चजन्यकुलोद्भवम् ।
कपोताण्डप्रमाणं तदतिकान्ति मनोहरम् ॥* ।
विशेषो यथा,—
“अश्विन्यादिकनक्षत्रे ये जाताः कम्बवः शुभाः ।
मौक्तिकं तेषु जातं हि सप्तविंशतिभेदभाक् ॥
शुक्लाशुक्लाः पीतरक्ता नीला लोहितपिञ्जराः ।
श्याकर्व्वुराः पाटलाश्च नववर्णाः प्रकीर्त्तिताः ॥
महन्मध्यलघून्मानैः सप्तविंशतिधा भवेत् ।
क्रमतस्तेषु विज्ञेयं नक्षत्रेषु मनीषिभिः ॥* ।
पाठीनपृष्ठस्य समानवर्णं
मीनात् सुवृत्तं लघु नातिसूक्ष्मम् ।
उत्पद्यते वारिचराननेषु
मीनाश्च ते मध्यचराः पयोधेः ।”
तथा च ।
“गुञ्जाफलकायश्यौल्यं मौक्तिकं तिमिजं लघु ।
पाटलापुष्पसङ्काशमल्पकान्ति सुवर्त्तुलम् ॥
वातपित्तकफद्वन्द्वसन्निपातप्रभेदतः ।
सप्त प्रकृतयो मीने सप्तधा तेन मौक्तिकम् ॥
अविष्ठमरुणं वातात् आपीतं मृदु पित्ततः ।
शुक्लं गुरु कफोद्रेकात् वातपित्तान्मृदुर्लघु ॥
वातश्लेष्मभवं स्थूलं पित्तश्लेष्मजमच्छकम् ।
सर्व्वलिङ्गप्रयोगेण सान्निपातिकमुच्यते ॥
एकजाः शुभदाः प्रोक्तास्तथा वै सान्निपातिकाः ॥* ।
भौजङ्गमं नीलविशुद्धवर्णं
सर्व्वं भवेत् प्रज्वलवर्णशोभम् ।
नितान्तधौतप्रतिकल्पमान-
निस्त्रिंशधारासमवर्णशोभम् ॥
भुजङ्गमास्ते विषवेगदृप्ताः
श्रीवासुकेर्व्वंशभवाः पृथिव्याम् ।
क्वचित् कदाचित् खलु पुण्यदेशे
तिष्ठन्ति ते पश्यति तान्मनुष्यः ॥
फणिजं वर्त्तुलं रम्यं नीलच्छायं महाद्युति ।
पुण्यहीना न पश्यन्ति वासुकेः कुलसम्भवम् ॥
शृगालकोलामलकोलगुञ्जा-
फलप्रमाणास्तु चतुर्विधास्ते ।
स्युर्ब्रह्मक्षत्रविट्शूद्र
सर्पेषु जाताः प्रवरास्तु सर्व्वे ॥
प्राप्यापि रत्नानि धनं श्रियंवा
राजश्रियंवा महतीं दुरापाम् ।
तेजोऽन्विताः पुण्यकृतो भवन्ति
मुक्ताफलस्यास्य विधारणेन ॥
जिज्ञासया रत्नविनिश्चयज्ञैः
शुभे मुहूर्त्ते प्रयतैः प्रयत्नात् ।
रक्षाविधानं सुमहद्विधाय
चर्म्मोपविष्टं क्रियते यदा तत् ।
तदा महद्दुन्दुभितूर्य्यघोषै-
र्घनैर्घनैराव्रियतेऽन्तरीक्षम् ॥
न तं भुजङ्गा न तु जातुधाना
न राक्षसा नापि च दुष्टलोकाः ।
हिंसन्ति यस्याहिशिरःसमुत्थं
मुक्ताफलं तिष्ठति कोषमध्ये ॥
भेकादिष्वपि जायन्ते मणयो ये क्वचित् क्वचित् ।
भौजङ्गममणेस्तुल्यास्ते विज्ञेया बुधोत्तमैः ॥
नक्षत्रमालेव दिवो विशीर्णा
दन्तावली तस्य महासुरस्य ।
विचित्ररूपेषु विचित्रवर्णा
पयःसु पत्युः पयसां पपात ॥
सम्पूर्णचन्द्रांशुकलापकान्ति-
र्मणिप्रवेकस्य महागुणस्य ।
तच्छुक्तिमत्सुस्थितिमाप बीज-
मासन् पुराप्यन्यभवानि यानि ॥